# shrItripurasundarI-suprabhAtam

# શ્રીત્રિપુરસુન્દરી સુપ્રભાતમ્

## Document Information

Text title : tripurasundarI-suprabhAtam 2

File name : tripurasupra2.itx

Category : suprabhAta, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : N.Balasubramanian bbalun at dataone.in

Proofread by : N.Balasubramanian bbalun at dataone.in

Latest update : March 29, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીત્રિપુરસુન્દરી સુપ્રભાતમ્

શ્રીસેવ્ય-પાદકમલે શ્રિત-ચન્દ્ર-મૌલે
શ્રીચન્દ્રશેખર-યતીશ્વર-પૂજ્યમાને।
શ્રીખણ્ડ-કન્દુકકૃત-સ્વ-શિરોવતંસે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥ ૧॥

ઉત્તિષ્ઠ તુઙ્ગ-કુલપર્વતરાજ-કન્યે ઉત્તિષ્ઠ
ભક્ત-જન-દુઃખ-વિનાશ-દક્ષે ।
ઉત્તિષ્ઠ સર્વ-જગતી-જનનિ પ્રસન્ને ઉત્તિષ્ઠ હે ત્રિપુરસુન્દરિ
સુપ્રભાતમ્ ॥ ૨॥

ઉત્તિષ્ઠ રાજત-ગિરિ-દ્વિષતો રથાત્ ત્વં ઉત્તિષ્ઠ
રત્ન-ખચિતત્ જ્વલિતાચ્ય પીઠાત્।
ઉત્તિષ્ઠ બન્ધન-સુખં પરિધૂય શંભોઃ ઉત્તિષ્ઠ
વિઘ્નિત-તિરસ્કરિણીં વિપાટ્ય ॥ ૩॥

યત્પૃષ્ઠભાગમવલમ્બ્ય વિભાતિ લક્ષ્મીઃ
યસ્યા વસન્તિ નિખિલા અમરાશ્ચ દેહે ।
સ્નાત્વા વિશુદ્ધહૃદયા કપિલા સવત્સા
સિદ્ધા પ્રદર્શયિતુમિહ નસ્તવ વિશ્વરૂપમ્ ॥ ૪॥

આકર્ણ્યતેઽદ્ય મદમત્ત-ગજેન્દ્રનાદઃ
    ત્વં બોધ્યસે પ્રતિદિનં મધુરેણ યેન ।
ભૂપાલરાગમુખરા મુખવાદ્યવીણા
    ભેરીધ્વનિશ્ચ કુરુતે ભવતીં પ્રબુદ્ધામ્ ॥ ૫॥

ત્વાં સેવિતું વિવિધ-રત્ન-સુવર્ણ-રૂપ્ય-
ખાદ્યમ્બરૈઃ કુસુમ-પત્ર-ફલૈશ્ચ ભક્તાઃ ।
શ્રદ્ધાન્વિતાઃ જનનિ વિસ્મૃત-ગૃહ્ય-બન્ધાઃ
આયાન્તિ ભારત-નિવાસિ-જનાઃ સવેગમ્ ॥ ૬॥

જીવાતવઃ સુકૃતિનઃ શ્રુતિરૂપમાતુઃ
   વિપ્રાઃ પ્રસન્ન-મનસો જપિતાર્ક-મન્ત્રાઃ ।
શ્રીસૂક્ત-રુદ્ર-ચમકાદ્યવધારણાય
   સિદ્ધાઃ મહેશ-દયિતે તવ સુપ્રભાતમ્ ॥ ૭॥

ફાલપ્રકાસિ-તિલકાઙ્ક-સુવાસિનીનાં
કર્પૂર-ભદ્ર-શિખયા તવ દૃષ્ટિ-દોષમ્ ।
ગોષ્ઠી વિભાતિ પરિહર્તુમનન્યભાવા
હે દેવિ પઙ્ક્તિશ ઇયં તવ સુપ્રભાતમ્ ॥ ૮॥

ઉગ્રઃ સહસ્ર-કિરણોઽપિ કરં સમર્પ્ય ત્વત્તેજસઃ પુરત એષ
વિલજ્જિતઃ સન્ ।
રક્તસ્તનાવુદયમેત્યગપૃષ્ઠલીનઃ પદ્મં ત્વદાસ્યસહજં કુરુતે
પ્રસન્નમ્ ॥ ૯॥

નૃત્યન્તિ બર્હનિવહં શિખિનઃ પ્રસાર્ય
ગાયન્તિ પઞ્ચમગતેન પિકાઃ સ્વરેણ।
આસ્તે તરઙ્ગતતિ-વાદ્ય-મૃદઙ્ગ-નાદઃ
તૌર્યત્રિકં શુભમકૃત્રિમમસ્તુ તુભ્યમ્ ॥ ૧૦॥

સંતાપ-પાપ-હરણે ત્વયિ દીક્ષિતાયાં
સંતાપ-હારિ-શશિ-પાપહરાપગાભ્યામ્ ।
કુત્રાપિ ધૂર્જટિ-જટા-વિપિને નિલીનં
છિન્ના સરિત્ ક્ષયમુપૈતિ વિધુશ્ચ વક્રઃ ॥ ૧૧॥

ભુક્ત્વા કુચેલ-પૃતુકં નનુ ગોપબાલઃ
આકર્ણ્ય તે વ્યરચયત્ સુહૃદં કુબેરમ્ ।
વ્યાજસ્ય નાસ્તિ તવ રિક્ત-જનાદપેક્ષા
નિર્વ્યાજમેવ કરુણાં નમતે તનોષિ ॥ ૧૨॥

પ્રાપ્નોતિ વૃદ્ધિમતુલાં પુરુષઃ કટાક્ષૈઃ દ્વન્દ્વી ધ્રુવં
ક્ષયમુપૈતિ ન ચાત્ર શઙ્કા।
મિત્રસ્તવોષસિ પદં પરિસેવ્ય વૃદ્ધઃ
ચન્દ્રસ્ત્વદીય-મુખશત્રુતયા વિનષ્ટઃ ॥ ૧૩॥

સૃષ્ટિ-સ્થિતિ-પ્રલય-સાક્ષિણિ વિશ્વ-માતઃ

સ્વર્ગાપવર્ગ-ફલ-દાયનિ શંભુ-કાન્તે ।
શ્રુત્યન્તખેલિનિ વિપક્ષ-કઠોર-વજ્રે ભદ્રે પ્રસન્ન-હૃદયે
તવ સુપ્રભાતમ્ ॥ ૧૪॥

માતઃ સ્વરૂપમનિશં હૃદિ પશ્યતાં તે
કો વા ન સિદ્ધ્યતિ મનશ્ચિર-કાંક્ષિતાર્થઃ ।
સિદ્ધ્યન્તિ હન્ત ધરણી-ધન-ધાન્ય-ધામ-
ધી-ધેનુ-ધૈર્ય-ધૃતયઃ સકલાઃ પુમાર્થાઃ ॥ ૧૫॥

Encoded and proofread by N.Balasubramanian bbalun@dataone.in

*shrItripurasundarI-suprabhAtam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*